दिनाङ्क :- 21.08.2025

प्रात: - 06:55

**प्रधानमन्त्री नरेन्द्रमोदी श्वः बिहार**

प्रधानमन्त्री नरेन्द्रमोदी श्वः बिहार-पश्चिमवङ्गराज्ययोः भ्रमणं करिष्यति। यात्रायाः समये प्रधानमन्त्री बिहारस्य गया-नगरे प्रायः त्रयोदश सहस्र-कोटिरूप्यकाणां बहुविध-विकास-परियोजनानां शिलान्यासं उद्घाटनं च विधास्यति । श्रीमोदी गङ्गा-नद्याः उपरि औन्टा-सिमरिया-सेतु-परियोजनायाः उद्घाटनं करिष्यति, येन उत्तर-दक्षिण-बिहारयोः मध्ये सम्पर्कः वर्धिष्यते। सः एन्. एच्.-31 इत्यस्य बख्तियार्पुर्-तः मोकामा-पर्यन्तं चतुष्पथ-खण्डस्य अपि उद्घाटनं करिष्यति, येन जनसम्मर्दः अल्प: भविष्यति।

स्वास्थ्यस्य मूलसौकर्याणां कृते प्रोत्साहनं कृत्वा प्रधानमन्त्री मुज़फ़्फ़रपुरे होमी भाभा-कर्करोग-चिकित्सालयस्य अपि च शोधकेन्द्रस्य उद्घाटनम् करिष्यति। एषा अत्याधुनिक-सुविधा बिहार-राज्यस्य समीपस्थ-राज्यानां च रोगिणां कृते उन्नत-सुलभ-कर्करोग-परिचर्यां प्रदास्यति । श्रीमोदी गया-दिल्ली-नगरयोः मध्ये अमृतभारत्-एक्स्प्रेस्-यानस्य, वैशाली-कोडरमा-नगरयोः मध्ये बौद्ध-सर्किट्-रेल्-यानस्य च ध्वजारोहणं करिष्यति।

**रेल्मन्त्री अश्विनी वैष्णवः**

रेल्मन्त्री अश्विनी वैष्णवः अघोषयत् यत् दीपावली-छठ्-उत्सवावसरेषु द्वादशसहस्त्र विशेषरेलयानानि सञ्चाल्यन्ते इति। तस्य बिहार-एन्. डी. ए. नेतृभिः सह चर्चायाः अनन्तरम् इयं घोषणा विहिता।

**बाइट-अश्विनि वैष्णव्-ट्रेन - 24 से.**

। सः अवदत् यत् जनानां यात्रायाः आवश्यकतानां विषये राज्यनेतृभिः सह चर्चायाः अनन्तरं मन्त्रालयः न केवलं नूतनानि रेलयानानि, अपितु अन्याः अनेकाः योजनाः, मूलसौकर्य-परियोजनाः च निरमात् इति।

मन्त्री अवोचत् यत् सामान्यवर्गस्य यात्रिकाणां सौख्यार्थं दिल्ली-गया, सहरसा-अमृतसर्, छप्रा-दिल्ली, मुज़फ़्फ़रपुर-हैदराबाद् इत्येतान् योजयितुं चत्वारि नूतनानि अमृतभारत-रेलयानानि आरभ्यन्ते इति। दिल्ली-नगरे, बिहार्-एन्. डी. ए-नेतारः आगामि-दीपावली-छठ्-उत्सवानां कृते रेल्-व्यवस्थायाः समीक्षार्थं केन्द्रीय-रेल्-मन्त्रिणा अश्विनी-वैष्णवेन सह मिलितवन्तः।

## ऑनलाइन क्रीडा विधेयक

ह्यः आई टी अथ इलेक्ट्रानिक्स् मन्त्री अश्विनी वैष्णवः अस्य वर्षस्य ऑनलाईन गेमिङ्ग् इत्यस्य प्रचारः विनिमयनञ्चाख्यं विधेयकम् लोकसभायाः पुरःस्थापितवान्। अस्य विधेयकस्य उद्देश्यः एतादृशानां क्रीडानां प्रतिकूलताभिः सामाजिक-आर्थिक-मनोवैज्ञानिक-गोपनीयतादिभिः प्रभावात् व्यक्तेः, विशेषतः यूनां, निर्धनजनसङ्ख्यायाश्च रक्षणमस्तीति।

## छत्तीसगढ-शरणागतिः

छत्तीसगढ-राज्ये दशमहिलाभिः सह एकोनत्रिंशत् माओवादिनः ह्यः शस्त्राणि त्यक्त्वा शरणागताः अभवन्। तेभ्यः प्रायः पञ्चविंशति लक्षरूप्यकाणां पुरस्कारस्य घोषणा कृता आसीत्। शरणागतानां मध्ये एकविंशतिः माओवादिनः दन्तेवाडा-मण्डले शस्त्राणि समर्पितवन्तः, अष्टौ नारायणपुर-मण्डले आरक्षकाणां, केन्द्रीय-सशस्त्र-बलानां च वरिष्ठ-अधिकारिणां समक्षं शरणागताः अभवन्।

## <u>जयशङ्कर रुस</u>

विदेशमन्त्री डा. एस्. जयशङ्करः मास्को-नगरे रशियादेशस्य प्रतिनिधिभिः, प्रमुखैः विद्वद्भिः, चिन्तकैश्च सह वार्तालापम् अकरोत्। सामाजिक-प्रसारमाध्यमे, मन्त्री अलिखत् यत् ते भारत-रशिया-सम्बन्धेषु, समकालीनविश्व-भूराजनीतिविषये, भारतस्य दृष्टिकोणस्य विषये च चर्चां कृतवन्तः इति।